पुलस्त्य उवाच ।
"यदाषाढ़ी समायाति व्रजते चोत्तरायणम् ।
तदा स्वपिति देवेशो भोगिभोगे श्रियः पतिः ॥
प्रतिसुप्ते विभौ तस्मिन् देवगन्धर्व्वगुह्यकाः ।
देवानां मातरश्चापि प्रसुप्ताश्चाप्यनुक्रमात् ॥
नारद उवाच ।
कथयस्व सुरादीनां शयने विधिमुत्तमम् ।
सर्व्वस्यानुक्रमेणैव पुरस्कृत्य जनार्द्दनम् ॥
पुलस्त्य उवाच ।
मिथुनाभिगते सूर्य्ये शुक्लपक्षे तपोधन ।
एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ॥
शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ।
कृत्वोपवीतकञ्चैव सम्यक् संपूज्य च द्विजान् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं स्वस्तिनिद्रां समानयेत् ॥
त्रयोदश्यां ततः कामः स्वपते शयने शुभे ।
कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते ॥
चतुर्द्दश्यां ततो यक्षाः स्वपन्ति सुखशीतले ।
सुवर्णपङ्कजकृते सुखास्तीर्णोपधानके ॥
पौर्णमास्यामुमानाथः स्वपते चर्म्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्ग्रथ्यान्यचर्म्मणा ॥
ततो दिवाकरो राशिं संप्रयाति च कर्कटम् ।
ततोऽमराणां रजनी भवते दक्षिणायनम् ॥
ब्रह्मा प्रतिपदि तथा नीलोत्पलदलेऽनघ ।
तल्पे स्वपिति देवानां दर्शयन् मार्गमुत्तमम् ॥
विश्वकर्म्मा द्वितीयायां तृतीयायां गिरेः सुता ।
विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्म्मराट् ॥
षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः ।
कात्यायनी तथाष्टम्यां नवम्यां कमलालया ॥
दशम्यां भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः ।
एकादश्यान्तु कृष्णायां साध्या ब्रह्मन् स्वपन्ति
हि ॥
एष क्रमस्ते गदितो निशायां शयने मुने ।
स्वपत्सु तेषु देवेषु प्रावृट्कालः समाययौ ॥
कङ्काः समं बलाकाभिरारोहन्ति नगोत्तमान् ।
वायसाश्चापि कुर्व्वन्ति नीड़ानि मुनिपुङ्गव ।
वायस्यश्च स्वपन्त्येता ऋतौ गर्भभरालसाः ॥
यस्यां तिथ्यां प्रस्वपिति विश्वकर्म्मा प्रजापतिः ।
द्वितीया सा शुभा पुण्या सुपुण्या शयनोदिता ॥
तस्यां तिथावर्च्य हरिं श्रीवत्साङ्कं चतुर्भुजम् ।
पर्य्यङ्कस्थं समं लक्ष्म्या गन्धपुष्पादिभिर्म्मुने ॥
ततो देवाय शय्यायां फलानि प्रक्षिपेत् क्रमात् ।
सुरभीणि निवेद्येत्थं विज्ञाप्यो मधुसूदनः ॥
यथा हि लक्ष्म्या न वियुज्यसे त्वं
त्रिविक्रमानन्त जगन्निवास ।
तथास्त्वशून्यं शयनं सदैव
अस्माकमेवेह तव प्रसादात् ॥
तदा त्वशून्यं तव देव तल्पं
स्वयं हि लक्ष्म्या शयने सुरेश ।
सत्येन तेनामितवीर्य्य विष्णो
गार्हस्थ्यनाशो मम चास्तु देव ॥
इत्युच्चार्य्य प्रणम्येशं प्रसाद्य च पुनः पुनः ।
नक्तं भुञ्जीत देवर्षे तैलक्षारविवर्जितम् ॥
द्वितीयेऽह्नि द्विजाग्र्याय फलं दद्याद्विचक्षणः ।
लक्ष्मीधर प्रीयतां मे इत्युच्चार्य्य निवेदयेत् ॥
अनेन तु विधानेन चातुर्मास्यव्रतं चरेत् ।
यावद्वृश्चिकराशिस्थः प्रतिभाति दिवाकरः ।
ततो विबुध्यन्ति सुराः क्रमशः क्रमशो मुने ॥
नभस्ये मासि च तथा या स्यात् कृष्णाष्टमी
शुभा ।
युक्ता मृगशिरेणैव सा तु कामाष्टमी स्मृता ॥
तस्यां सर्व्वेषु लिङ्गेषु तिथौ स्वपिति शङ्करः ।
वसते सन्निधाने तु तत्र पूजाक्षया स्मृता ॥"
इति वामने १६ अध्यायः ॥ * ॥
अथ हरिशयनादिव्यवस्था । भविष्यनारदी-
ययोः ।
"मैत्राद्यपादे स्वपितीह विष्णु-
र्व्वैष्णवमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
मैत्रमनुराधा । वैष्णवं श्रवणा । पौष्णं रेवती ।
भविष्ये ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
इत्यस्य नक्षत्रयोगप्राप्तौ फलातिशयः । एत-
द्विधानं वामनपुराणे ।
"एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥"
अनुज्ञां लब्ध्वा इत्यन्वयः । एकादशीसमये दिवा-
शयनीयकल्पनं रात्रौ द्वादशीक्षणे निद्रेति ।
विष्णुधर्म्मोत्तरे ।
"स्वास्तीर्णशयनं कृत्वा प्रीणयेच्छेषशायिनम् ।
आषाढ़शुक्लद्वादश्यां विष्णुलोके महीयते ॥"
स्वास्तीर्णशयनं शोभनास्तरणयुक्तं खट्टादि ।
वराहपुराणे श्रीभगवानुवाच ।
"अन्यत्तु संप्रवक्ष्यामि कर्म्म संसारमोचनम् ।
कदम्बकुटजश्चैव धवकोऽर्ज्जुनकस्तथा ॥
एभिरभ्यर्च्चनं कुर्य्याद्विधिदृष्टेन कर्म्मणा ।
ततः संस्थापनं कृत्वा मम मन्त्रविधिः स्मृतः ।
नमो नारायणायोक्त्वा इमं मन्त्रमुदीरयेत् ॥
पश्यन्तु मेघानपि मेघश्यामं
ह्युपागतं सिच्यमानं महीमिमाम् ।
निद्रां भगवान् गृह्णातु लोकनाथ
वर्षास्विमं पश्यतु मेघवृन्दम् ॥
मास्येव पश्यैव च लोकनाथ मासा-
श्चत्वारि वैकुण्ठस्य च पश्य नाथ ।
आषाढ़शुक्लद्वादश्यां सर्व्वशान्तिकरम् शिवम् ॥
य एतेन विधानेन भूमि ! मे कर्म्म कारयेत् ।
स पुमान् न प्रणश्येत्तु संसारेषु युगे युगे ॥
शयने कुटजविधानात् विष्णुधर्म्मोत्तरीयनिषे-
धोऽन्यत्र । धवकः कपित्थः । संस्थापनं समा-
पनम् । भूमि इति पृथिव्याः सम्बोधनम् ।
"एवमुक्तेन मन्त्रेण कृष्णं सुष्वापयेत्ततः ।
सुप्ते त्वयि जगन्नाथ जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इति मन्त्रेण पूजयेत् ॥ * ॥
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटदानं भवेद्विष्णोर्म्महापूजा प्रवर्त्तते ॥"
कटदानं पार्श्वपरिवर्त्तः । कामरूपीयनिबन्धे ।
"एवं संपूज्य विधिवत् भाद्रस्य द्वादशीदिने ।
मन्त्रेणानेन देवेशं पार्श्वेन परिवर्त्तयेत् ॥
वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ॥
त्वयि सुप्ते जगन्नाथ जगत् सर्व्वं चराचरम् ॥"
ब्रह्मपुराणे ।
"एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥"
रात्रौ प्रसुप्तमित्यन्वयः । बोधनन्तु दिवैव ॥
"कृत्वा वै मम कर्म्माणि द्वादश्यां मत्परो नरः ।
ममैव बोधनार्थाय इमं मन्त्रमुदीरयेत् ॥
महेन्द्ररुद्रैरभिनूयमानो
भवानृषिर्व्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृष्व जागृष्व च लोकनाथ ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शारद्यपुष्पाणि च लोकनाथ ।
अहं ददानीति च पुण्यहेतो-
र्जागृष्व जागृष्व च लोकनाथ ॥
एवं कर्म्माणि कुर्व्वीरन् द्वादश्यां ये यशस्विनि ।
मम भक्ता नरश्रेष्ठास्ते यान्ति परमां गतिम् ॥"
अत्र मन्त्रद्वयपाठानन्तरम् ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति सम्प्रदायागतस्तृतीयः श्लोक इति वाच-
स्पतिमिश्राः ॥ शयनोत्थानमन्त्रास्तु कल्पतरु-
प्रभृतिग्रन्थसंवादाल्लिखिताः । तदेवं द्वादश्यां
एकादश्यां वा रेवत्यन्तपादयोगवशाद्दिवोत्थानं
नक्षत्रयोगाभावे तु द्वादश्यामेव कारयेदिति
गुरुचरणाः । जीमूतवाहनस्तु भविष्ये ।
"आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्त्तबोधनम् ॥"
आ-भा-का-सितपक्षेषु आषाढ़भाद्रकार्त्तिक-
शुक्लपक्षेषु । एषाच द्वादश्यां प्राप्तौ मुख्य-
कल्पः । भविष्यपुराणम् ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
विष्णुधर्म्मोत्तरे ।
"विष्णुर्दिवा न स्वपिति न रात्रौ प्रतिबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥
अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्येनाहोरात्रं विचिन्तयेत् ॥"
वचनान्तरम् ।
"रेवत्यन्तो यदा रात्रौ द्वादश्या च समन्वित
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥